# Devaih Kritam 10 Vishnu Stotram

# देवैः कृतं १० विष्णुस्तोत्रम्

## Document Information

Text title : Devaih Kritam 10 Vishnu Stotram

File name : devaiHkRRitaM10viShNustotram.itx

Category : vishhnu, vishnu, skandapurANa, stotra, aShTaka

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : skandapurANa | brAhmakhaNDa | dharmAraNyakhaNDa | adhyAya 15/11-18||

Latest update : June 9, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 9, 2025

*sanskritdocuments.org*

# देवैः कृतं १० विष्णुस्तोत्रम्

देवा ऊचुः ।
नमस्तेऽस्तु जगद्बीज नमस्ते कमलापते ।
नमस्तेऽस्तु सुरेशान नमस्ते कमलेक्षण ॥ १॥

त्वं स्थितिः सर्वभूतानां त्वमेव शरणं सताम् ।
त्वं हन्ता सर्वदुष्टानां हयग्रीव नमोऽस्तु ते ॥ २॥

त्वमोङ्कारो वषङ्कारः स्वाहा स्वधा चतुर्विधा ।
आद्यस्त्वं च सुरेशान त्वमेव शरणं सदा ॥ ३॥

यज्ञो यज्ञपतिर्यज्वा द्रव्यं होता हुतस्तथा ।
त्वदर्थं हूयते देव त्वमेव शरणं सखा ॥ ४॥

कालः करालरूपस्त्वं त्वं वार्कः शीतदीधितिः ।
त्वमग्निर्वरुणश्चैव त्वं च कालक्षयङ्करः ॥ ५॥

गुणत्रयं त्वमेवेह गुणहीनस्त्वमेव हि ।
गुणानामालयस्त्वं च गोप्ता सर्वेषु जन्तुषु ॥ ६॥

स्त्रीपुंसोश्च द्विधा त्वं च पशुपक्ष्यादिमानवैः ।
चतुर्विधं कुलं त्वं हि चतुराशीतिलक्षणः ॥ ७॥

दिनान्तश्चैव पक्षान्तो मासान्तो हायनं युगम् ।
कल्पान्तश्च महान्तश्च कालान्तस्त्वं च वै हरे ॥ ८॥

इति स्कन्दपुराणे ब्रह्मखण्डे धर्मारण्यखण्डे पञ्चदशाध्यायान्तर्गतं
देवैः कृतं विष्णुस्तोत्रं समाप्तम् ।

स्कन्दपुराण । ब्राह्मखण्ड । धर्मारण्यखण्ड । अध्याय १५/११-१८॥

skandapurANa . brAhmakhaNDa . dharmAraNyakhaNDa . adhyAya 15/11-18..

Proofread by PSA Easwaran

*Devaih Kritam 10 Vishnu Stotram*

pdf was typeset on June 9, 2025

Please send corrections to *sanskrit@cheerful.com*